# उल्लासः

## प्रवेशिका

### संक्षिप्त-संस्करणम्



विद्ययाऽमृतमश्नुते

एन सी ई आर टी
NCERT

राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद्
NATIONAL COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING



एताः कलाकृतयः गेहे गेहे भवन्तु,

अयमेव मम स्वप्नः

साक्षरतया सशक्ता भूत्वा

कश्चन इतिहासः रचनीयः

# आमुखम्

राष्ट्रिय-शिक्षा-नीतिः २०२० पञ्चदश-वर्षीयाणाम् अथवा ततः अधिक-आयुःवर्गीयाणां सर्वेषां तेषां सर्वेषाम् अपि जनानां साक्षरतानिमित्तम् अवसरनिर्माणे प्रतिबद्धतां करोति ।, ये जनाः कैश्चिदपि कारणैः अक्षर-संख्ययोः ज्ञानम् अर्जयितुं न शक्तवन्तः, सन्दर्भेऽस्मिन् शिक्षा-नीतेः अनुशंसानां क्रियान्वयनार्थं भारत-सर्वकारेण २०२२ तमे वर्षे अप्रेल-मासस्य प्रथमे दिनाङ्के 'नव-भारत-साक्षरता' (यस्य प्रसिद्धं नाम उल्लासः अस्ति) इति कार्यक्रमः प्रारब्धः । यस्मिन् वयस्क-शिक्षायाः सर्वेऽपि पक्षाः समायोजिताः सन्ति । उल्लासस्य उद्देश्यम् आधारभूत-साक्षरतायाः, सङ्ख्याज्ञानस्य, महत्त्वपूर्ण-जीवन-कौशलानां, व्यावसायिक-कौशलानाम्, आधारभूत-शिक्षायाः एवञ्च सतत-शिक्षायाः विकासः अस्ति ।

नव-भारत-साक्षरता-कार्यक्रमस्य अभिलेखे उल्लिखितं वर्तते यत् "२०११ तमे वर्षे कृतायाः जनगणनायाः अनुसारेण देशे पञ्चदश-वर्षीयाणां ततः अधिक-आयुवर्गीयाणां वा अक्षरज्ञानविहीनानां जनानां सङ्ख्या २५.७६ कोटिः (पुरुषाः ०९.०८ कोटिः, महिलाः १६.६८ कोटिः) वर्तते । २००९-२०१० वर्षतः २०१७-२०१८ वर्ष-पर्यन्तं साक्षर-भारत-कार्यक्रमस्य अन्तर्गतं प्रमाणितानां साक्षर-जनानां सङ्ख्यायां ०७.६४ कोटि-परिमितस्य प्रगतिम् अवलोक्य अनुमीयते यत् भारते अधुना अपि प्रायः १८.१२ कोटि-परिमिताः वयस्काः अक्षरज्ञानविहीनाः सन्ति ।" राष्ट्रिय-शिक्षा-नीतिः २०२० तः २०३० वर्ष-पर्यन्तं १०० प्रतिशतं साक्षरतार्थं लक्ष्यं निर्धारयति एवञ्च राष्ट्रिय-शैक्षिक-अनुसन्धानम् एवं प्रशिक्षण-परिषदि राष्ट्रिय-साक्षरता-केन्द्रस्य स्थापनायाः अनुशंसां करोति । अस्य लक्ष्यस्य प्राप्तये राष्ट्रियस्तरे राज्यस्तरे च अनेके प्रयासाः नैरन्तर्येण क्रियमाणाः सन्ति ।

एते शिक्षार्थिनः स्व-जीवनस्य विविधेषु सन्दर्भेषु स्वभाषायाः अन्यभाषाणां वा मौखिकप्रयोगं कुर्वन्ति एवञ्च गणितीयावबोधेन सह स्व-कार्येषु विनिमयम् अपि कुर्वन्ति । पठनं लेखनं सङ्ख्याज्ञानं चैव एतेषाम् आवश्यकता येन तेषां गुणवत्तापूर्णस्य गरिमामयस्य च जीवनस्य मार्गः प्रशस्तः भवेत् ।

'उल्लास'स्य अर्थः वर्तते – समाजे सर्वेषां जनानां कृते आजीवनम् अधिगमस्य बोधः । (ULLAS- Understanding of Lifelong Learning for All in Society) एवञ्च 'जन जन साक्षर' इति उल्लासस्य आदर्शवाक्यं वर्तते । नवभारत-साक्षरता-कार्यक्रमस्य (उल्लासस्य) अन्तर्गतं निरक्षराणां शिक्षार्थिनां कृते चतुर्षु भागेषु उल्लास-प्रवेशिकायाः (सङ्क्षिप्त-संस्करणस्य) निर्माणं कृतम् अस्ति । एतत् -प्रवेशिकायाः (उल्लास-प्रवेशिकायाः (चतुर्णां भागानां) सङ्क्षिप्त-संस्करणम् अस्ति । एताः प्रवेशिकाः समेकितरूपेण निर्मिताः सन्ति, यासु गणितं भाषा च द्वयमपि सम्मिलिते स्तः । विषयरूपेण ७ विषयाः सुनिश्चिताः सन्ति, ये प्रायः अस्माकं समीपे दृश्यन्ते श्रूयन्ते प्रयोज्यन्ते च । ते च विषयाः – परिवारः प्रतिवेशः च, संवादः, अस्माकं जीवनशैली, अस्माकं परिवेशः, आहारः स्वास्थ्यं च, मतदानम्, न्यायसम्बद्धं ज्ञानम् इति । शिक्षार्थिनां पठनस्य लेखनस्य अंकगणितस्य च शिक्षणं सरलं भवेत् इत्येतदर्थम् एतस्याः मार्गदर्शिकायाः अपि निर्माणं कृतम् अस्ति । एषा मार्गदर्शिका स्वयंसेवि-शिक्षकाणां द्वारा अथवा शिक्षकाणां द्वारा उपयोगाय निर्मिता वर्तते । अनेन शिक्षार्थिनां शिक्षणं इतोऽपि सरलं भविष्यति । प्रवेशिकासु मार्गदर्शिकायां च प्रदत्ताः बिन्दवः परामर्शाय वर्तन्ते । शिक्षार्थिनां स्तरं, क्षमतां, आवश्यकताः एवञ्च स्थानीय-परिवेशं ज्ञात्वा एतेषु आवश्यकतानुसारं परिवर्तनं कर्तुं शक्यते ।

प्रवेशिकायाः सङ्क्षिप्त-संस्करणे आधारभूत-साक्षरतया सङ्ख्याज्ञानेन च सम्बद्धान् शिक्षणबिन्दून् केन्द्रे संस्थाप्य शिक्षार्थिनां स्वयंसेवि-शिक्षकाणां च कृते सर्वेषु विषयेषु आधारितानि अभ्यापत्रकाणि अन्तर्जालीय-प्रतिमानानि चलच्चित्राणि चापि निर्मितानि सन्ति।

'उल्लासः' प्रवेशिकायाम् प्रामुख्येन शिक्षार्थिनां स्वयंसेविनां शिक्षकाणां च कृते आधारभूत-साक्षरतया संख्याज्ञानेन च सम्बद्धानां शिक्षणबिन्दूनाम् अन्तर्जालीय-प्रतिमानानाम् अथवा चलच्चित्राणां निर्माणम् अपि कृतम् अस्ति यत् 'दीक्षामञ्चे' (DIKSHA Portal) सर्वेषां कृते शिक्षा (सभी के लिये शिक्षा) इति वर्टिकल एवञ्च एनसीईआरटी इत्यस्य 'यूट्यूब चैनल' @NCERTOFFICIAL इत्यस्मिन् उपलब्धम् अस्ति । मार्गदर्शिकायाः चलच्चित्रकार्यक्रमस्य च सहयोगेन शिक्षार्थिनां शिक्षणाधिगमे सहयोगि।

परिषद् प्रवेशिकायाः सङ्क्षिप्त-संस्करणस्य निर्माणे सम्मिलितानां सर्वेषाम् अपि विषय-विशेषज्ञानाम् एवञ्च परिषदः संकाय-सदस्यानां परियोजनायाः कार्यकर्तॄणां च परिश्रमस्य कृते कृतज्ञतां प्रकटयति। तथैव तेषां सर्वेषां रचनाकाराणां संस्थानां प्रति अपि वयं कृतज्ञा अस्ति। ये याश्च अस्माकं पुस्तके स्वस्य सामग्रीः प्रयोक्तुम् उदारतापूर्वकं सहयोगं कृतवन्तः । एतासां प्रवेशिकानां परिष्कारार्थम् उत्तरोत्तरम् अभिवर्धनार्थं च भवतां/भवतीनां परामर्शानां परिषद् स्वागतं करोति।

दिनेश प्रसाद सकलानी
निदेशकः
राष्ट्रिय-शैक्षिक-अनुसंधानम्
एवञ्च प्रशिक्षण-परिषद्

सितंबरमासः २०२४
नवदेहली

# प्रस्तावना

साक्षरता, पठनं लेखनम् एवञ्च सङ्ख्याज्ञानं प्रत्येकं जनस्य आधारभूता आवश्यकता वर्तते । यया गौरवपूर्णं जीवनयापनं कर्तुं शक्येत । राष्ट्रियशिक्षानीतिः २०२० इत्यस्य अनुशंसानां क्रियान्वयनार्थं भारतसर्वकारेण 'नवभारत-साक्षरता-कार्यक्रमः' इति योजना प्रारब्धा, अस्याः योजनायाः लोकप्रियं नाम 'उल्लासः' इति (ULLAS – Understanding of lifelong Learning for All in Society) वर्तते – समाजे सर्वेभ्यः जीवनपर्यन्तम् अधिगमनस्य अवबोधः । इति अस्याः योजनायाः उद्देश्यम् अस्ति – १५ वर्षीयाः ततोऽधिकवर्षीयाः वयस्काः च तथा साक्षराः कर्तव्याः यथा तेषां व्यक्तित्वं सुदृढं स्यात् एवञ्च ते समाजस्य विकासक्रमे स्वकीयं योगदानं प्रदातुं शक्नुयुः ।

राष्ट्रिय-शिक्षानीतिः – २०२० इत्यस्य अनुशंसायाः अनुरूपम् – 'नव-भारत-साक्षरता-कार्यक्रमे' मुख्यतया पञ्च घटकाः सम्मिलिताः सन्ति । (१) आधारभूत-साक्षरता एवञ्च सङ्ख्याज्ञानम् (२) महत्त्वपूर्ण-जीवनकौशलम् (३) आधारभूत-शिक्षा (४) व्यावसायिकं कौशलम् (५) सतत-शिक्षा । असाक्षराणां शिक्षार्थिनां कृते आधारभूत-साक्षरतायाः सङ्ख्याज्ञानस्य च अध्यापनार्थम् अस्याः 'उल्लासः - प्रवेशिकायाः' निर्माणं कृतम् अस्ति । एषा प्रवेशिका भागचतुष्टये विभक्ता वर्तते । अस्यां प्रवेशिकायां भाषा गणितञ्च द्वयम् अपि समाविष्टम् अस्ति । एषा प्रवेशिका भाषायाः गणितस्य च अधिगम-प्रतिफलेषु आधारिता वर्तते । अस्यां प्रवेशिकायां विषयवस्तुरूपेण तादृशानां १३ विषयाणां संग्रहणं कृतम् अस्ति ये विषयाः सर्वेषाम् अपि वयस्कानां जीवनेन सह सम्बद्धाः सन्ति । ते च यथा – परिवारः प्रतिवेशः च, संवादः, अस्माकं जीवनशैली, अस्माकं परिवेशः, आहारः स्वास्थ्यञ्च, मतदानम्, न्यायसम्बद्धं ज्ञानम्, आपदा-प्रबन्धनम्, समयः, अङ्कीय-सङ्ख्या (डिजिटल संख्या), वित्तकोषः, दिनदर्शिका, पर्यावरणम् आन्तर्जालिक-सुरक्षा चेत्यादयः । उदाहरणार्थम् – अष्टमः पाठः 'विभिन्नाः आपदः' इत्यस्मिन् पाठे आपदां प्रबन्धनविषयः उक्तः, यस्मिन् अग्निः, जलप्लावः, भूकम्पः, रेलयानस्य दुर्घटना इत्यादिषु विषयेषु चर्चा कृता वर्तते । 'उल्लासः' इति प्रवेशिकायां भाषाकौशलानां गणितस्य अवधारणाः च सहैव उक्ताः सन्ति । उदाहरणार्थम् – 'अस्माकम् आचारः' इति तृतीये पाठे बृहच्चित्रेण संस्कृतस्य परिचितानां शब्दानां सञ्ज्ञानम्, पठनम्, अक्षराणां सञ्ज्ञानम् (यथा - ओ, औ, झ, द, ल, ग, क, य) एवञ्च २१ तः ५० पर्यन्तं सङ्ख्यानां सञ्ज्ञानं, पठनं लेखनं च, एककानां दशकानां च समूहे गणनां, तथैव १ तः ५० पर्यन्तं सङ्ख्यानां सङ्कलनं व्यवकलनं च अध्यापयितुं प्रयत्नः कृतः अस्ति । एवमेव मतदानम् इत्यस्मिन् पाठे क्ष, घ, ध, ढ इत्येतानि अक्षराणि, १२ अथवा २४ होरात्मिकायाः घट्याः माध्यमेन समयज्ञानं, दिनदर्शिकां, समय-सारिणीम् अङ्कीय-सङ्ख्याः च अध्यापयितुं प्रयत्नः कृतः अस्ति । स्वयम्सेविनः शिक्षकाः शिक्षणस्य प्रतिफलानि ध्यात्वा स्वसमीपे उपलब्धानाम् अन्येषां वस्तूनाम् अपि प्रयोगं कर्तुं शक्नुवन्ति ।

आशास्महे यत् उल्लासस्य चत्वारः अपि भागाः पठन-कौशलं लेखन-कौशलं च अर्जयितुं एवञ्च गणितस्य सामान्यज्ञानं प्राप्तुम् असाक्षराणां शिक्षार्थिनां कृते सहायकाः भविष्यन्ति इति ।

सामग्र्याः संवर्धनार्थं भवतां समेषां प्रतिक्रियाः सादरम् आमन्त्र्यन्ते ।

उषा शर्मा
प्रवक्ता (प्रोफेसर) एवं प्रभारी
राष्ट्रिय-साक्षरता-केन्द्र-प्रकोष्ठः
एनसीईआरटी

# स्वयंसेवि-शिक्षकैः सह वार्तालापः

राष्ट्रियशिक्षानीतेः २०२० इत्यस्याः अन्तर्गतम् 'सर्वेषां कृते शिक्षा' (पूर्वम् एतस्याः योजनायाः नाम प्रौढशिक्षा इति) एतस्याः योजनायाः अनुशंसानां क्रियान्वयनाय 'उल्लासः' इत्यत्र राष्ट्रियस्तरे विविधप्रकाराणां शैक्षणिकसामग्रीणां निर्माणस्य उल्लेखः कृतः अस्ति। राष्ट्रियशिक्षानीतिः २०२० मुख्यघटकरूपेण मूलभूतसाक्षरतायां सङ्ख्याज्ञाने च केन्द्रीकरणपूर्वकं शिक्षार्थिनां जीवनेन सह सम्बद्धेषु कौशलेषु विशिष्टं ध्यानं ददाति। नवभारतसाक्षरता-कार्यक्रमे प्रदत्तानां दिशानिर्देशानां सम्पादनाय 'उल्लासः' इति विशिष्टमाध्यमरूपेण दृश्यते, यः शिक्षार्थिनां कृते पठनं लेखनम्, इति प्रशिक्षणाय अनेकसम्भावनानां द्वाराणि उद्घाटयति। एनम् एव बिन्दुम् अधिकृत्य उल्लास-प्रवेशिका-संक्षिप्त-संस्करणस्य निर्माणं कृतम् अस्ति, यत् च मूलभूतसाक्षरतया सङ्ख्याज्ञानेन सह सम्बद्धस्य प्रशिक्षणस्य परिणामानां प्राप्तौ सहायकं भवति। अत्र पठनं लेखनं च युगपत् भवति, अर्थात् भाषा गणितं च एकीकृतरूपेण भवति। सप्तसु अध्यायेषु विभाजिते अस्मिन् **उल्लास-प्रवेशिका-संक्षिप्त-संस्करणे** मूलभूतसाक्षरतया संख्याज्ञानेन च सह जीवनस्य महत्त्वपूर्णकौशलं यथा - स्वास्थ्यं मतदानम्, न्यायसम्बद्धं ज्ञानं लोकजीवनम् इति एते विषयाः प्राथम्येन वर्तन्ते।

मूलभूतसाक्षरता सङ्ख्याज्ञानं च सर्वेषां कृते शिक्षायाः एकं महत्त्वपूर्णं साधनम् अस्ति। एतस्य उद्देश्यम् अस्ति यत् एतत् पञ्चदशवर्षीयान् अथवा ततोऽप्यधिकान् वयस्कान् शिक्षितान् करोति ये शिक्षिताः सन्ति परन्तु अक्षरज्ञानेन रहिताः सन्ति अर्थात् ते असाक्षराः सन्ति। उल्लासस्य अन्तर्गतत्वेन पठनस्य लेखनस्य अपि च सङ्ख्याज्ञानस्य कौशलम् तेषां शिक्षार्थिनां सकाशे आनयति ये कैश्चित् कारणैः विद्यालयं गन्तुं न शक्तवन्तः, शिक्षया विमुखाः च आसन्। येते पूर्वतः अपि केषाञ्चित् जनानां साहाय्येन किञ्चित् पठने समर्थाः स्युः, एतदर्थं पठनस्य पाठनस्य च अस्यां प्रक्रियायां शिक्षार्थिनः विविधस्तरेषु भवितुम् अर्हन्ति। एतत् विशेषेण अवधातव्यं यत् एते शिक्षार्थिनः प्रबुद्धाः सन्ति, तेषु जीवनस्य महान् अनुभवः अस्ति, सम्भवतः कुशलाः अपि स्युः। एते शिक्षार्थिनः सम्भवतः कर्मठाः अथवा केनापि श्रमेण आजीविकाम् अपि चालयन्तः स्युः। एतः गृहे अथवा गृहात् बहिः दायित्ववन्तः जनाः अपि भवितुम् अर्हन्ति। अस्माकम् उद्देश्यम् एतत् अस्ति यत् तेषां जीवनं वयं साक्षरतया प्रकाशयामः, तेषां जीवनं सरलं सुगमं च कर्तुं तेषां साहाय्यं कुर्मः। तेन पठनेन लेखनेन गणितस्य अवबोधद्वारा च स्वानुभवैः अधिकं प्रशिक्षणं प्राप्नुयुः, चिन्तनस्य अवबोधस्य च आधिक्येन विस्तारं कुर्युः। अथ च ते शिक्षार्थिनः जीवनं सरलं कर्तुं स्वस्याः क्षमतायाः विकासस्य पूर्णप्रयोगं कुर्युः येन देशस्य समाजस्य च उत्थानम् अपि भवेत्।

**शिक्षार्थिनां कृते पठनस्य लेखनस्य च प्रशिक्षणकाले ध्यातव्यं यत् –**

- एतस्याः प्रवेशिकायाः उद्देश्यम् अस्ति यत् मूलभूत-साक्षरतया सङ्ख्याज्ञानेन सह च सर्वान् अपि शिक्षार्थिनः योजयामः।
- एते शिक्षार्थिनः १५ वर्षीयाः अथवा ततः अधिकवयस्काः सन्ति, येषां समीपे पर्याप्तः अनुभवः अस्ति। एतत् अपि भवितुं शक्नोति यत् तेषाम् अनुभवः अस्माकम् अपेक्षया अधिकः स्यात्। अतः तेषाम् अनुभवस्य सम्मानं कुर्वन्तु, तेभ्यः आदरं प्रयच्छन्तु एवञ्च तेषां वार्ताः सावधानं शृण्वन्तु।
- ते स्वस्य दैनिक-कार्याणि स्वस्य अनुरूपं कुर्वन्ति, अतः तेषां कार्यकुशलतायाः प्रशंसाम् अपि कुर्वन्तु।
- एतत् ध्यातव्यं यत् ते पठनस्य लेखनस्य च प्रक्रियायां तदा एव ध्यानपूर्वकं संलग्नाः भविष्यन्ति यदा ते पठनेन लाभः अस्ति इति जानीयुः। अतः तान् पूर्णतया सज्जान् कृत्वा पाठयन्तु एवञ्च अधिकाधिकं तेषां जीवनेन सह सम्बद्धानाम् अनुभवानाम् उदाहरणरूपेण बोधने प्रयोगं कुर्वन्तु।
- एते शिक्षार्थिनः संस्कृतभाषायाः श्रवणे वार्तायां च समर्थाः सन्ति, ते स्वस्य वार्तालापेषु अस्याः भाषायाः प्रयोगं कुर्वन्ति। अतः ध्यानं प्रयच्छन्तु यत् अस्य भाषाज्ञानस्य प्रयोगं कृत्वा वयं तेभ्यः पठनस्य लेखनस्य च अवसरं यच्छामः। एतदपि भवितुं शक्नोति यत् शिक्षार्थिनः गणितस्य मौखिकप्रयोगान् एवञ्च गणनायाः सामान्यान् प्रकारान् जानन्ति, किन्तु अङ्कान् न परिचिन्वन्ति एवञ्च गणितीयसमस्यानां निवारणे कष्टम् अनुभवन्ति। तदा तेषां गणितीयज्ञानं कारयद्भिः प्रवर्धयद्भिः च भवद्भिः अङ्कज्ञानेन सह ते योजनीयाः।
- चित्राणां, कथानकानां, वार्तापत्राणां च आधारेण पाठानां पाठनस्य प्रयत्नं कुर्वन्तु। चित्राणां पठनं, वार्तापत्राणां पठनम् अथवा अनुमानं, चित्राणि दृष्ट्वा तेषाम् अधः लिखितानां शब्दानाम् अनुमानेन पठनम् इत्येते विषयाः - पठनपाठनस्य शिक्षाशिक्षणयोः च प्रकाराः सन्ति। चित्रेषु एकं वस्तु अपि भवितुम् अर्हति, एका पूर्णा प्रक्रिया अथवा घटना अपि। आवश्यकतानुसारं चित्राणां प्रयोगः विभिन्नैः प्रकारैः कर्तुं शक्यते, यथा – चित्रस्य विषये वार्तालापः कर्तुं शक्यते, चित्रे प्रदत्तस्य वस्तुनः विषये घटनायाः वा विषये चर्चा भवितुम् अर्हति। चित्रस्य माध्यमेन अनुमानं कृत्वा महत्त्वपूर्ण-जीवन-कौशले आधारितस्य कस्यचित् विषयस्य चिन्तनं विश्लेषणं च कर्तुं शक्यते। प्रवेशिकायाम् अपि चित्रं दृष्ट्वा अनुमानं कृत्वा पठनस्य अवसराः प्रदत्ताः सन्ति। यथा – गृहस्य चित्रं दृष्ट्वा गृहम् इति शब्दस्य अनुमानं कृत्वा पठनम्, परिवारस्य जनानां चित्रं दृष्ट्वा परिवारः इति शब्दस्य अनुमानं पठनम् च।
- अस्माकं शिक्षार्थिनां शब्दभण्डारः(शब्दसङ्ग्रहः) विशालः अस्ति, अतः अस्य प्रयोगं कृत्वा तेषां

पठनस्य लेखनस्य च शिक्षायां सहयोगः कर्तव्यः। अस्य कृते कस्यचित् व्यक्तेः अथवा वस्तूनां नाम्नां माध्यमेन तत्र आगतानाम् अक्षराणां शब्दानां च परिचये बलं प्रदातव्यम्।

**आधारभूत-साक्षरता** –

- वयं भाषां पूर्णतया वदामः पठामः च, न तु पृथक् पृथक्। शब्दानां विच्छेदं कृत्वा संयोजनं कृत्वा च पठनं लेखनं च शिक्षयितुं न शक्यते। अतः पठनस्य लेखनस्य च शिक्षणकाले एतत् स्मरन्तु यत् शब्दानां वाक्यानां च सहयोगेन अक्षराणां परिचयकारणस्य शब्दानां पाठनस्य च कार्यं क्रियेत। यथा – "म" इत्यस्य वर्णस्य ज्ञानाय ते शब्दाः दर्शनीयाः पाठनीयाः च येषु "म" इत्यस्य प्रयोगः कृतः स्यात्, यथा – आम्रम्, माला, मुखम्, भ्रमणम् इत्यादयः।
- भाषा कस्मिँश्चित् सन्दर्भे स्वस्य अवबोधनं कारयति। भाषायां सन्दर्भेन सहैव लेखनं पठनं च शिक्षयेयुः। सन्दर्भं विना भाषायाः अर्थपूर्णत्वमेव न सम्भवति, यथा – 'उत्तर' इति शब्दस्य प्रयोगः क्रियते तर्हि एतत् अवगन्तुं समस्या आगच्छति यत् वयम् 'दिशा' विषये चर्चां कुर्वन्तः स्मः उत कस्यचित् प्रश्नस्य उत्तरस्य विषये। वाक्ये तस्य प्रयोगः (यथा – मम प्रहेलिकायाः उत्तरम् अहं प्राप्तवान्) अस्मिन् वाक्ये सन्दर्भस्य प्रयोगः अर्थस्य उचितं ज्ञानं कारयितुं पाठकस्य सहायतां करोति। वर्णमायाः द्वारा अपि अक्षरज्ञानस्य अक्षरावगमनस्य च विकासं कर्तुं प्रयासः शक्यते, परन्तु तत्पूर्वं अक्षराणि शब्देषु दर्शयित्वा उच्चारणं कारयित्वा पुनः तेषां परिचयः कारणीयः। तदनन्तरमेव वर्णमालाद्वारा अक्षरज्ञानस्य परिचयः दृढः करणीयः। अनेन "भाषायाः शब्दसङ्ग्रहः" यस्य उपयोगः शिक्षार्थिनः स्वस्य दैनिकजीवने प्रतिदिनं कुर्वन्ति, तेन युक्त्वा पठनस्य प्रयासं करिष्यन्ति।
- प्रवेशिकायां अक्षरैः सह भिन्न-भिन्न-मात्राः योजयित्वा तेषां मात्राणां परिचयकरणम् अपि शिक्ष्यमाणम् अस्ति। अनेन शिक्षार्थिनः कृते अक्षरस्य ध्वनेः च सम्बन्धम् अवगन्तुं सरलता भविष्यति, एवं तेषाम् अवगमनशक्तेः अपि विकासः भविष्यति, यथा – प, पा, पि, पी इत्यादि।
- भाषाक्रीडामाध्यमेन अपि पठनं लेखनं च शिक्षयितुं सहायता प्राप्यते। तेन सह अक्षरस्य ध्वनेः च सम्बन्धस्य अवगमने विकासः भवति, येन पठने लेखने च सरलता भवति। यथा – एक-अक्षरात् अधिकानाम् अक्षराणां प्रयोगं कृत्वा शब्दनिर्माणं पठनं च, शब्दानाम् उच्चारणम्, पठनं लेखनं च इत्यादि।
- अक्षरजालस्य प्रयोगं कृत्वा अपि अक्षरस्य मात्रायाः च परिचयसम्बद्धज्ञानस्य विकासः सुदृढरूपेण कर्तुं शक्यते। अक्षरजालं शब्दनिर्माणस्य शब्दानां परिचयकरणस्य च एकः महत्त्वपूर्णः विकल्पः वर्तते। प्रवेशिकायां बहुषु स्थानेषु भाषाक्रीडा प्रदत्ता वर्तते, यत्र शब्दानां परिचयस्य कार्यम् एवं शब्दान् ज्ञात्वा शब्देषु गोलाकाररूपः गतिविधिः प्रदत्तः वर्तते।

**आधारभूत-सङ्ख्याज्ञानम्**

- सङ्ख्या-ज्ञानं भाषया सहैव योजयित्वा पाठयितुं प्रवेशिकायाम् उभौ एकीकृतरूपेण सम्मिलितौ वर्तेते। कथायाः एवं कवितायाः भाषा तथा च सङ्ख्याज्ञानम् एकत्र स्थापितम् अस्ति, यतः द्वयोः अपि अवगमनं सम्यक्तया भवेत्।
- शिक्षार्थिनां सङ्ख्याज्ञानेन सह पूर्वपरिचयः स्यादेव, यतोहि ते स्वस्य दैनिकजीवने सङ्ख्यायाः श्रवणम् ईक्षणं प्रयोगं च कुर्युः एव, तत्र यथा धनस्य विनिमयः, वस्तूनां क्रयणम्, शाकस्य क्रयणं विक्रयणं वा, वस्तूनां गणना इत्यादयः भवितुम् अर्हन्ति। एतेषु कार्येषु सङ्ख्याज्ञानस्य आवश्यकता भवति। अतः शिक्षार्थिनः पूर्वज्ञानस्य अवलोकनं कृत्वा एव पाठनस्य आरम्भं कुर्यात्।
- वयं सङ्ख्यानां परिचयं कारयितुं स्वं परितः स्थितानां वस्तूनाम् उपयोगं कर्तुं शक्नुमः। यथा – अङ्कानां परिचयं कारयितुं चलदूरवाण्याः प्रयोगः शक्यते। यतः चलदूरवाणी सर्वेषां दैनिकजीवनस्य आवश्यकतया सह युक्ता वर्तते, किञ्च अनेन प्रकारेण बोधनेन ते सम्यक्तया अवगमिष्यन्ति यत् पठनं लेखनं च अस्माकं जीवनस्य सारल्यकरणे सहायकं वर्तते। प्रवेशिकायाम् एतादृशैः उदाहरणैः सह सङ्ख्याज्ञानस्य परिचयं कारयितुं प्रयत्नः कृतः अस्ति।
- केषाञ्चित् शिक्षार्थिनां वस्तूनां गणनायाः ज्ञानं भवितुम् अर्हति, अतः वस्तूनि गणयित्वा सङ्ख्यायाः परिचयं कारयन्तु। शिक्षार्थिनः सङ्ख्याज्ञानानन्तरम् एव अन्यान् गणितीयविषयान् अवगमिष्यन्ति ज्ञास्यन्ति च।
- प्रवेशिकायां सङ्ख्यानां परिचयं कारयित्वा भवन्तः, स्फोरकपत्रकादीनां पुनश्च अन्य-सामाग्रीणां प्रयोगं कृत्वा तस्य ज्ञानम् अवगमनं च द्रढीकारयितुं शक्नुवन्ति। संख्यात्मकपत्रकस्य (फ्लैशकार्ड्) उपयोगेन अपि सङ्ख्यानां ज्ञानं कारयितुं शक्नुवन्ति।
- गणितीय-अवधारणेन सह सम्बन्धं स्थापयितुं दैनन्दिनजीवनस्य बहूनि उदाहरणानि सन्ति।
- योगः व्यवकलनं च इत्यादीनि गणितीय-अवधारणानि वस्तुभिः सह पाठयन्तु, यथा - चत्वारि त्रीणि च योजयित्वा किं प्राप्नोति, इति दर्शयितुं त्रिषु समानवस्तुषु चतुर्भिः समानवस्तुभिः सह मेलयित्वा दर्शयन्तु पुनश्च योगं कर्तुं प्रेरयन्तु। तथैव व्यवकलनाय वस्तूनि निष्कास्य गणयितुं वदन्तु।
- प्रवेशिकायां रूप्यकाणाम् उपयोगेन अपि योगं व्यवकलनं च कर्तुं शिक्षितम् अस्ति, येन योग-व्यवकलनयोः गणितीय-अवधारणाम् अवगन्तुं शक्येत, तथा च रूप्यकाणाम् अवगमने अपि कार्यं कर्तुं शक्येत। शिक्षिकाभिः सह लघु-गतिविधिम् अपि कारयितुं शक्यते, येन धनव्यवहारस्य अवगमनं, योग-व्यवकलनयोः गणितीय-अवधारणं च युगपत् बोधयितुं शिक्षयितुं च शक्यते। यथा - आपणात् वस्त्रक्रयणं, तैलक्रयणं, पादरक्षाक्रयणम् इत्यादिषु वस्तुषु तेषां मूल्यं, मात्रा,

परिमाणस्य एककम् इत्यादिषु विषयेषु चर्चां कर्तुं शक्यते।

- कथा-गीत-माध्यमेन अपि गणितीय-अवधारणानि बोधयितुं शक्यते। एककं दशकम् इत्यादीनि अवधारणानि बोधयितुं दैनन्दिनजीवनसम्बद्धान् अनुभवान् स्वीकर्तुं प्रयासं कुर्वन्तु, येन शिक्षार्थिनाम् अवगमनं सुदृढं भवेत्। भिन्न-भिन्न-वस्तूनि पुटीकृत्य अपि एताम् अवधारणां बोधयितुं शक्यते। एतेन शिक्षार्थिनां कृते अपि अवगमनं सुकरं भविष्यति यतो हि ते स्वस्य व्यक्तिगतजीवने एतादृशं कार्यं कुर्वन्ति।
- प्रवेशिकायां गुणन-अवधारणां शिक्षयितुं योगस्य उपयोगः कृतः अस्ति। एतेन न केवलं योगस्य अवगमनं सुदृढं भविष्यति अपितु गुणनस्य अवगमनम् अपि सुकरं भविष्यति। एतेन सह एतत् अपि महत्त्वपूर्णम् अस्ति यत् वस्तुभिः सह गुणनम् अपि बोधनीयम्, यथा – चतुर्णां गुणनं शिक्षयितुम् एकं वस्तु वारचतुष्टयं दर्शनीयम्। तथैव २ × २ दर्शयितुं शिक्षयितुं च २ वस्तूनि भिन्नसमूहद्वये स्थापयित्वा गणयित्वा च बोधनीयम्।
- परिमाणस्य अवधारणां भार-मापन-कठोर-तरल-पदार्थेषु विभिन्नेषु - मापनविधिषु चर्चां कृत्वा बोधयन्तु। शिक्षार्थिनः मापनस्य एककं वस्तुक्रयणकाले शृण्वन्ति तथा च एतेन सह परिचिताः अपि भवन्ति। अस्माकम् उद्देश्यम् अस्ति यत् शिक्षार्थिनां पूर्वमेव यत् ज्ञानं वर्तते, तस्य विषये अवगमनं भवेत् तथा च तेन ज्ञानेन सह योजयित्वा मापन-एककानां परिचयं कारयन्तु।
- भिन्नप्रमाणानां पात्राणाम् उपयोगेन एककानाम् अवगमनस्य विषये चर्चां कुर्वन्तु तथा च वयं कथं कस्य एककस्य उपयोगं कस्य प्रकारस्य वस्तुनः कृते कुर्मः इति विषये च चर्चां कुर्वन्तु। एकक-रूपान्तरणस्य विषये अपि एतादृशीं चर्चां कर्तुं शक्यते, येन एककानाम् अवगमनं वर्धयितुं शक्यते। यदि कश्चित् शाकविक्रयणे प्रवृत्तः अस्ति तर्हि भारमापनं याचित्वा दर्शयित्वा च किलोग्राम-परिमाणस्य ग्राम-परिमाणस्य च ज्ञानार्थं सुकरं भविष्यति, तथैव दुग्धमापनयन्त्राणि दर्शयित्वा लीटर इत्यस्य अवगमने साहाय्यं कर्तुं शक्यते।
- समय-अधिगमनाय प्रवेशिकायां सूच्यात्मिका अङ्कीया च इति उभयोः घटिकयोः उदाहरणैः चर्चा कृता अस्ति। प्रयासं कुर्वन्तु यत् समयाधिगमनाय एकां भित्तिघटिकां शिक्षार्थिनां समक्षे प्रस्तुत्य, घटिकायाः सूचिकानाम् अवगमनं कारयन्तु, पुनश्च सूचिकाः भ्रामयित्वा समयञ्च मुहुर्मुहुः परिवर्त्य, समय-अधिगमं कारयन्तु, शिक्षार्थिनः स्वयं घटिकां दृष्ट्वा समयं वदेयुः इति ध्यातव्यम्। अनेन प्रकारेण समयज्ञानम् इति पाठ्यबिन्दुः रुचिकरः अपि भविष्यति तथा च विषयवस्तुनः अधिगमः अपि सम्यक्तया भविष्यति इति।
- अङ्कात्मिकां घटिकां शिक्षार्थिनां समक्षे अवश्यमेव प्रस्तुवन्तु, येन ते शिक्षार्थिनः अङ्कीय

(डिजिटल्)-संख्यायाः सम्यक्तया अवबोधनं कर्तुं शक्नुवन्ति । अङ्कात्मिका(डिजिटल्) तुला, घटिका इत्यादीनि विषय-वस्तूनि सरलतया ते पठितुं शक्नुवन्ति ।

- द्वादशहोरात्मिका चतुर्विंशतिहोरात्मिका च घटिके पठितुं विभिन्नाः पद्धतयः सन्ति । अतः चतुर्विंशतिहोरात्मिकायाः घटिका कथं पठनीया इत्यस्मिन् विषयेऽपि चर्चा करणीया, तथा च चतुर्विंशतिहोरात्मिका-घटिकायाः पठनस्य पद्धतिम् अपि दर्शयन्तु । रेलचिटिकायाः सहायतया अपि चतुर्विंशतिहोरात्मिका-घटिकायाः अवबोधनं कारयितुं शक्नुवन्ति ।
- दिनदर्शिकां पठितुं द्रष्टुञ्च शिक्षार्थिनां बोधनाय एकां दिनदर्शिकां दर्शयन्तु । मासानां नामानि दिनाङ्कं च पठितुं शिक्षयन्तु । प्रतिदिनं शिक्षार्थिभ्यः मासं दिनाङ्कं च वक्तुं कार्यं ददतु, येन ते शिक्षार्थिनः दिनदर्शिकायाः प्रयोगं कुर्युः पठेयुः च ।
- प्रवेशिकायां महत्त्वपूर्णेषु जीवनकौशलैः सम्बन्धितेषु विषयेषु यथा- विधि-ज्ञानम्, वित्तीय-साक्षरता, मतदानम्, वित्तकोष-सम्बन्धित-ज्ञानम् इत्यादिषु विषयेषु चर्चाभिः पर्याप्ताः अवसराः प्रदत्ताः सन्ति । धनादेश-पुस्तिका(चेक बुक), धनसमर्पणप्रपत्रम् इत्यादि पठितुं पूरयितुं च शिक्षार्थिनाम् अवबोधं कारयन्तु इति ।

**अनन्ताः शुभकामनाः**

# निर्माण-समितिः

**अध्यक्षः**

दिनेश प्रसाद सकलानी, निदेशकः, रा.शै.अ.प्र.प. नवदेहली

**परामर्शसमितिः**

चमूकृष्णशास्त्री, अध्यक्षः, भारतीयभाषासमितिः, नवदेहली
प्रो. चाँदकिरण सलूजा, निदेशकः, संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
अनूप कुमार राजपूत, आचार्यः (प्रोफेसर) एवम् अध्यक्षः, प्रकाशनप्रभागः, रा.शै.अ.प्र.प. नवदेहली
रंजना अरोड़ा, आचार्या (प्रोफेसर) एवम् अध्यक्षा, पाठ्यचर्या अध्ययनविभागः, रा.शै.अ.प्र.प. नवदेहली
संध्या सिंह, आचार्या (प्रोफेसर) एवम् अध्यक्षा, भाषाशिक्षाविभागः, रा.शै.अ.प्र.प. नवदेहली
श्रीधर श्रीवास्तव, संयुक्तनिदेशकः, रा.शै.अ.प्र.प. नवदेहली

**निर्माण-समितिः**

डॉ.मनमोहन शर्मा, वरिष्ठशोधाध्येता, संयोजकः 'उल्लासः' (संस्कृतम्) संस्कृतसंवर्धनप्रतिष्ठानम्
प्रदीप पौडेल, वरिष्ठशोधाध्येता संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
विष्णु प्रसाद उपाध्याय, वरिष्ठशोधाध्येता संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
गानमूर्ति, वरिष्ठशोधाध्येता संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
खगेन्द्र दहाल, वरिष्ठशोधाध्येता संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
उमेश कुमार पाण्डेय, अनुवादकः संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
नरेन्द्र शर्मा, अनुवादकः, संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
जया टंडन, अनुवादिका, संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली

**समीक्षा-समितिः**

प्रो. चाँदकिरण सलूजा, निदेशकः, संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
डॉ.जितेन्द्र मोहन शर्मा, आचार्यः, रा.शै.अ.प्र.प. नवदेहली
डॉ.देवकीनन्दन, सहायकाचार्यः, रा.शै.अ.प्र.प. नवदेहली
डॉ.नितिन कुमार जैन, सहायकाचार्यः, केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली
डॉ.परमेश कुमार शर्मा, सहायकाचार्यः, केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली
लक्ष्मीनरसिंहन्, कार्यपालकाधिकारी, संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
डॉ.मनमोहन शर्मा, वरिष्ठशोधाध्येता, संस्कृतसंवर्धनप्रतिष्ठानम्

**समन्वयन-सदस्या**

उषा शर्मा, आचार्या एवं प्रभारी, राष्ट्रिय-साक्षरता-केन्द्र-प्रकोष्ठः, रा.शै.अ.प्र.प. नवदेहली

# कृतज्ञता

अस्मिन् पुस्तके येषां साहित्यरचनाः स्वीकृताः परिषद् तेषां सर्वेषां विदुषां कृतज्ञतां प्रकटयति । रचनानां प्रकाशनाय अनुमतिं प्रदत्तवन्तं भोपाल-नगरस्य 'एकतारा' इति संस्थायाः निदेशकं सुशीलशुक्लं, (दीपावल्याः प्रदीप्ताः दीपकाः); भोपाल-नगरस्य, लोक-चित्रकारं सुभाषव्यामं दुर्गाबाईव्यामं च, (जलवाहिनी), स्वर्गवासिनं निरङ्कारदेवसेवकं (समयस्य अनुपालनम्), श्यामसुशीलं (वर्णगीतम्), प्रभातम् (ज्ञानुः ज्ञानी ज्ञानं तथा च सेव्यतां संस्कृतम्), निशातफ़ारूकम् (सहायता तु प्राप्ता किन्तु कथं एवञ्च मम लेखा मम प्रतिष्ठा), लोक-कथा-निमन्त्रणम्, (अनुपम कहानियाँ) (सेवानिवृत्तम्) कार्यकारि-निदेशकं (रेलवेबोर्ड) प्रेमपालशर्माणम् (गान्धिनः आत्मकथायाः), अजमेर-नगरस्य क्षेत्रीय-शिक्षा-संस्थानस्य शिक्षा-विभागस्य अध्यक्षम् आयुष्मान्-गोस्वामिनम् (कथाः) च प्रति परिषद् कार्तज्ञ्यं प्रकटयति ।

पुस्तके चित्राङ्कनाय इयं परिषद् नव-देहलीनगरस्य शशि-शेट्ये-वर्यं; राजस्थान-राज्यस्य जयपुर-नगरस्य लोकचित्रकारिकां (माण्डना शैली) सुनीतां; मध्य-प्रदेशस्य भोपाल-नगरस्य लोक-चित्रकारं (गोंड-भित्ति-शैली) सुभाष-व्यामं, मध्य-प्रदेशस्य भोपाल-नगरस्य लोक-चित्रकारिकां (गोंड-भित्ति-शैली) दुर्गाबाई-व्यामं, मध्य-प्रदेशस्य भोपाल-नगरस्य लोक-चित्रकारं (गोंड-भित्ति-शैली) मानसिंह-व्यामं, राजस्थान-राज्यस्य उदयपुर-नगरस्य प्रशान्त-सोनीं, उत्तर-प्रदेशस्य नोएडा-नगरस्य सागर-अरणकल्ले-वर्यं, मध्य-प्रदेशस्य चंदेरी-नगरस्य शुभम-लखेरां, मध्य-प्रदेशस्य ग्वालियर-नगरस्य हबीब-अलीं, मध्य-प्रदेशस्य देवास-नगरस्य जितेन्द्र-चौरसियां, मध्य-प्रदेशस्य धार-नगरस्य हरिओम पाटीदारं, नीलेश-गहलोतं, नव-देहलीनगरस्य तापोशी-घोषालं, नव-देहलीनगरस्य रुचिन-सोनीं, पश्चिम-बङ्गाल-राज्यस्य कोलकाता-नगरस्य मयूख-घोषं, बिहार-राज्यस्य मधुबनी-नगरस्य सच्चिदानन्द-झां, ओडिशा-राज्यस्य भुवनेश्वर-नगरस्य राधाश्याम राउतं बिहार-राज्यस्य मधुबनी-नगरस्य श्रेयसी-दत्तं प्रति च विशिष्टां कृतज्ञतां विज्ञापयति ।

परिषदा भारतीय-निर्वाचन-आयोगस्य, राष्ट्रिय-मतदातृ-सेवा-सञ्जालस्य, भारतीय-कृषि-अनुसन्धान-केन्द्रस्य, सामाजिक-न्याय-अधिकारिता-मन्त्रालयस्य, प्रधानमन्त्रि-जन-धन-योजनायाः, राष्ट्रिय-आपत्-प्रबन्धन-प्राधिकरणस्य, राष्ट्रिय-साक्षरता-मिशन-प्राधिकरणस्य, मध्य-प्रदेशस्य इन्दौर-नगरस्य राज्य-संसाधन-केन्द्रस्य च कृतज्ञता मन्यते यस्य जालपुटात् प्रवेशिकायाः निर्माणार्थम् उपयोगिन्यः सामग्र्यः चित्राणि च स्वीकृतानि ।

परिषद् प्रवेशिकायाः विकासाय विभिन्न-चरणेषु सहयोगाय राष्ट्रिय-साक्षरता-केन्द्र-प्रकोष्ठस्य परामर्शदातारं अमनगुप्ता-महोदयं प्रति एवञ्च नवदेहलीस्थितस्य संस्कृतसंवर्धनप्रतिष्ठानस्य परियोजना-अधिकारिणं शंकरलाल-सोनी-वर्यं, पुस्तकस्वरूपं (Indigene work) प्रदत्तवतः रीता-विनोद-पङ्कज-इत्येतान् (मुक्तकर्मिणः) प्रति एवञ्च ग्राफिक-विन्यासकारिके सोनम-मिताल्यौ प्रति च कृतज्ञतां प्रकटयति । एतेषां/एतासां महता सहयोगेन इदं कार्यं निर्विघ्नतया सुसम्पादितम् ।

# विषय-सूची

*आमुखम्* *iii*
*प्रस्तावना* *vi*
*स्वयंसेवि-शिक्षकैः सह वार्तालापः* *vii*
*निर्माणसमितिः* *xiii*
*कृतज्ञता* *xiv*

**वर्ण-परिचयः** **२–२६**
- स्वर-वर्णाः
- व्यञ्जन-वर्णाः
- *वर्णमाला*

**१. परिवारः प्रतिवेशः च** **२७–४५**
- अ, आ, न, प, स, र, व
- १ तः २० पर्यन्तं सङ्ख्या-परिचयं, पठनं लेखनं च।

**२. संवादः** **४६–६५**
- इ, ई, ब, त, म, ख, ट, च
- २१ तः ५० पर्यन्तं सङ्ख्या-परिचयं, पठनं लेखनं च।
- १ तः ५० पर्यन्त-सङ्ख्यानां संकलनं व्यवकलनं च।
- एककस्य दशकस्य च समूहे गणनाम्।

**३. अस्माकं जीवनशैली** **६६–८७**
- ओ, औ, झ, द, ल, ग, क, य
- ५१ तः १००० पर्यन्तं संख्यानां परिचयं, पठनं लेखनं च
- एककं, दशकं सहस्रकं च इत्येतेषां समूहेषु गणनाम् (स्थानीय-मानम्)
- २ अङ्कीयानां सङ्ख्यानां सङ्कलनं व्यवकलनं च।
- १ अङ्कीयानां सङ्ख्यानां गुणनम्।
- १००-१०० सङ्ख्यानां समूहेषु गणनाम्।

## ४. अस्माकं परिवेशः ८८–१०३

- ए, ऐ, क, ज,भ, ड, श, ष, अं, अँ
- ३ अङ्कानां सङ्ख्यानां सङ्कलनं व्यवकलनं च।।
- दीर्घतायाः, भारस्य धारितायाः च मापनम्।
- २ अङ्कीय-सङ्ख्यानां १ अङ्कीयसङ्ख्याभिः गुणनम्।
- विभाजनस्य अवबोधनम्।

## ५. आहारः स्वास्थ्यं च १०४–११७

- उ, ऊ, ह, छ, थ, फ, ठ, ङ
- समयस्य दर्शनम् (होरा, निमेषाः, क्षणानि)।
- समयस्य एककानां परस्परं परिवर्तनम्।
- अङ्कीय-सङ्ख्यानां सञ्ज्ञानं लेखनं च।

## ६. मतदानम् ११८–१२९

- क्ष, घ, ध, ढ
- समयमापनस्य उपयोगः कथं करणीयः (१२ एवं च २४ होरात्मिका घटिका)
- निदर्शिकायां, समय-सारिण्यां रेल-चिटिकायां च दत्तानां सूचनानाम् अवगमनम्।

## ७. न्यायसम्बद्धं ज्ञानम् १३०-१३९

- त्र, श्र, ण, ऋ, ज्ञ, द्य
- न्यायसम्बद्धायाः शब्दावल्याः अवबोधनं पठनं च।
- वित्तकोष-सम्बद्धानां प्रपत्राणां पठनम्, अवगमनं पूरणञ्च।
  (धनादेशं, सङ्ग्रहण-प्रपत्रं, निष्कासन प्रपत्रम्)
- अन्तर्जालीय-सुरक्षायाः (साइबर-सुरक्षा) विषये ज्ञानम्